aglasem.com

FOR AP CLASS 10 PREPARATION

AP SSC Model Paper 2027 OSSC Sanskrit Main Language Paper 2 - Model Paper 2

EXAM	YEAR	TYPE	SUBJECT
AP Class 10	2027	Sample Paper	Sanskrit

BLUE PRINT & MODEL PAPERS OF SSC PUBLIC EXAMINATIONSFOR THE ACADEMIC YEAR 2026 – 27
BY THE DIRECTOR OF GOVERNMENT EXAMINATIONS (S.S.C. BOARD), A.P.,

24S

SANSKRIT (Main language)

संस्कृतम् (प्राच्योन्नतपाठशालानाम्)

प्रारूपप्रश्नापत्रम् – 2 : 2026 – 27

(MODEL QUESTION PAPER – 2026 – 27)

समयः : 3.15 **निमेषाः** | **गरिष्ठाङ्काः** : 100

छात्राणां सूचनाः :

1. अस्मिन् प्रश्नपत्रे त्रयः विभागाः भवन्ति ।
2. प्रश्नपत्रपठनाय 15 निमेषाः , समाधानलेखनाय 3 घण्टाः समयः भवति।
3. प्रश्नानां समाधानानि समाधानपत्रे एव लेखनीयानि ।
4. भाषांशाः इति विभागे विद्यमानानां प्रश्नानां समाधानानि समाधानपत्रे **एकत्रैव** लेखनीयानि ।

विभागः - I

अवगाहनम्

अ) अधः दत्तं गद्यांशं पठित्वा प्रश्नानां समाधानानि लिखन्तु। $4 \times 2 = 8$

1. पितृवाक्यपरिपालकः श्रीरामः वनवासं कुर्वन् चित्रकूटे वसति स्म । रामम् अयोध्याम् आनेतुं भरतः परिवारसहितः तत्र गतवान् । भरतं दृष्ट्वा श्रीरामः तं समीपम् उपावेश्य तस्य राज्यस्य चापि क्षेमं पृष्टवान्। तदङ्गतया अनेकान् राजनीति विषयान् अपि उपदिष्टवान्।

प्रश्नाः – क) पितृवक्यपरिपालकः श्रीरामः वनवासं कुर्वन् कुत्र वसति स्म?

ख) रामम् अयोध्यां आनेतुं कः परिवारसहितः तत्र गतवान्?

ग) भरतं दृष्ट्वा श्रीरामः किं कृतवान् ?

घ) रामः भरताय कान् विषयान् उपदिष्टवान् ?

आ) **अधः दत्तं गद्यांशं पठित्वा प्रश्नानां समाधानानि लिखन्तु।** $4 \times 2 = 8$

2. कश्चन व्याधः एकदा मृगयार्थं वनं गतवान् । बहुकालानन्तरं सः एकं वराहं दृष्टवान् । वराहं लक्ष्यीकृत्य सः बाणप्रयोगं कृतवान् । वराहस्य शरीरे महान् व्रणः जातः । व्रणितः वराहः कोपेन व्याधस्य उपरि आक्रमणं कृतवान् । तेन व्याधः मृतः । बाणप्रहारवेदनया वराहः अपि मृतः।

प्रश्नाः च) व्याधः किमर्थं वनं गतवान् ?

छ) व्याधः तत्र कं दृष्टवान् ?

ज) व्याधः कस्योपरि बाणप्रहारं कृतवान् ?

झ) कस्य शरीरे व्रणः जातः ?

इ) **अधः दत्तं गद्यांशं आन्ध्रभाषया अनुवदन्तु ।** $1 \times 8 = 8$

3. भारतदेशजातीयपताकस्य रूपकर्ता श्री पिंगलि वेंकय्य महोदयः । अयं क्रिष्णा जनपदे मुव्वयि मण्डलान्तर्गते भट्लपेनुमर्रु इति ग्रामे 1876 आगष्ट् 2 दिनाङ्के जातः।अस्य माता वेंकटरत्नम्मा ।पिता हनुमन्तरायुडु । सः प्राथमिकविद्यां पेदकळेपल्लि ग्रामे अभ्यस्तवान् । अयं 19 वयसि दक्षिणाप्रिकादेशे गान्धीमहोदयं मिलितवान् । अयं बोयर् इति युद्धे भागं गृहीतवान् । 1916 वर्षे लक्को जातीयकांग्रेस्समावेशे जातीयपताकाविष्करणं कृतवान् ।

ई) **अधः दत्तानां प्रश्नानां समाधानानि 4 – 5 वाक्येषु लिखन्तु ।** $3 \times 4 = 12$

4) सन्मित्ररहितस्य जीवनं शून्यं किमर्थम् ?

5) चन्द्रापीडस्य विद्याभ्यासः पाठस्य कविमुद्दिश्य लिखन्तु ?

6) प्रियंवदा शकुन्तलायाः स्वगृहत्यागसमये प्रकृतेः अवस्थां कथं वर्णयति ?

उ) 7 – 11 **पर्यन्तं निर्देशानुसारं लिखन्तु ।** $5 \times 2 = 10$

7) **नालन्दायां <u>विग्रह + आराधनम्</u>** नासीत् ।

रेखाङ्कितपदानां सन्धिकार्यं, सन्धिनाम च चिन्वन्तु

अ) विग्रहराधनम् , गुणसन्धिः
आ) विग्रहाराधनम् ,सवर्णदीर्घसन्धिः
इ) विग्रहराधनम् , सवर्णदीर्घसन्धिः
ई) विग्रहाराधनम् , गुणसन्धिः

8) अनन्तः **<u>रत्नोदधिः</u>** अस्माकं आनन्दं जनयति ।

रेखाङ्कितपदस्य विसन्धिकार्यं, सन्धिनाम च चिन्वन्तु

अ) रत्न + उदधिः , गुणसन्धिः
आ) रत्न + ऊदधिः , वृद्धिसन्धिः
इ) रत्ना + उदधिः , गुणसन्धिः
ई) रत्ना + ऊदधिः ,सवर्णदीर्घसन्धिः

9) हे छात्र! फलानि **<u>एक + एकं</u>** गणयतु। **रेखाङ्कितपदानां सन्धिकार्यं सन्धिनाम च लिखन्तु।**

10) **<u>रूपसंपन्नः</u>** वेङ्कटरावः सुशीलां परिणीतवान्।

रेखाङ्कितपदस्य विग्रहवाक्यं, समासनाम च चिन्वन्तु

अ) रूपं च संपन्नः च , द्वन्द्वसमासः
आ) रूपे संपन्नः , सप्तमीतत्पुरुषसमासः
इ) रूपाय संपन्नः, चतुर्थीतत्पुरुषसमासः
ई) रूपेण संपन्नः, तृतीयातत्पुरुषसमासः

11) मानवेन आजीवनं **<u>जपः दानञ्च</u>** करणीयौ ।

रेखाङ्कितपदयोः समस्तपदं , समासनाम च लिखन्तु।

ऊ) 12 तः 25 पर्यन्तं निर्देशालुसारं लिखन्तु। 14 × 1= 14

12) शिशोः **<u>वदनं</u>** आनन्दं जनयति । **रेखाङ्कितपदस्य समानार्थकपदं चिन्वन्तु**

अ) मुखम् आ) वालम्

इ) वामहस्तम् ई) वन्दनम्

13) **<u>तरवः</u>** हि प्राणभूताः भूतले । **रेखाङ्कितपदस्य समानार्थकपदं चिन्वन्तु**

अ) पत्राणि आ) तपोवनानि

इ) कुसुमानि ई) वृक्षाः

14) **<u>इन्दुः</u>** कौमुदीं प्रसारयति । **रेखाङ्कितपदस्य समानार्थकपदं लिखन्तु**

15) **परोपकाराय <u>पुण्यं</u>** करणीयम् । **रेखाङ्कितपदस्य विरुद्धार्थकपदं चिन्वन्तु**

अ) प्रशान्तम् आ) पावनम्

इ) पापम् ई) पनसम्

16) कंसस्य **<u>शत्रुः</u>** कृष्णः । **रेखाङ्कितपदस्य विरुद्धार्थकपदं चिन्वन्तु**

अ) मित्रम् आ) स्वसा

इ) सारथिः ई) मातुलेयः

17) **<u>पुरा</u>** घण्टाकर्णः नाम राक्षसः आसीत् । **रेखाङ्कितपदस्य विरुद्धार्थकपदं लिखन्तु**

18) " **भिषक्** " इत्यस्य इतरवचने लिखन्तु ।

अ) भिषजौ – भिषजः आ) भिषग्भ्याम् – भिषग्भ्यः

इ) भिषग्भ्याम् – भिषग्भिः ई) भिषजोः – भिषजाम्

19) " **विदुषि** " इति पदस्य विभक्तिं लिखन्तु ।

अ) चतुर्थी आ) सप्तमी

इ) पञ्चमी ई) द्वितीया

20) " **येन** " इति पदस्य इतरवचने लिखन्तु ।

21) " **इच्छति** " इत्यस्य इतरवचने लिखन्तु ।

अ) इच्छतः – इच्छन्ति आ) इच्छथः – इच्छथ

इ) इच्छवः – एषिष्यामः ई) इच्छथः – इच्छन्ति

22) " **अमिलत्** " इति क्रियापदस्य वर्तमानकालरूपं लिखन्तु ।

अ) मिलति आ) मेलिष्यति

आ) मिलतु ई) मिलेत्

23) " **कथयिष्यति** " इति पदस्य इतरवचने लिखन्तु ।

24) " **मन्मथः** " इति पदस्य व्युत्पत्यर्थं चिन्वन्तु।

अ) माति वर्तते गर्भोऽत्र आ) मनांसि मथ्नाति

इ) मनसि मुञ्चति ई) मनुं मथयति

25) " **धरति विश्वम्** " इति व्युत्पत्यर्थस्य व्युत्पत्तिपदं लिखन्तु।

विभागः – II

मृदुत्वम्

ऋ) अधः दत्तानां प्रश्नानां समाधानानि 9 -10 वाक्येषु लिखन्तु । $2 \times 8 = 16$

26) हिरण्यकवृत्तान्तः इति कथायाः सारांशं स्वीयवाक्यैः लिखन्तु ?

अथवा

वर्तमानकाले प्राक-शास्त्रि (Inter) – शास्त्रि (Degree) – आचार्य (M.A.) – वृत्तिशिक्षादीनाम् (B.Ed, M.B.B.S.,etc) अध्ययनार्थं परिकल्पितां छात्रप्रवेशपद्धतिं लिखन्तु

27) पतिगृहप्रापणसमये लोके सामान्यजनैः अनुभूयमानं दुःखं वर्णयन्तु ।

अथवा

समिष्टिकुटुम्बजीवने स्त्रीणां प्राधान्यम् उद्दिश्य दशवाक्यानि लिखन्तु ।

ऋ) निर्देशानुसारं लिखन्तु। $2 \times 2 = 4$

28) रामः विद्यालयं गच्छति । पाठं पठति। (त्त्वा)

वाक्यद्वयं त्त्वा प्रत्ययोजनेन समुचितं संश्लिष्टवाक्यं चिन्वन्तु।

अ) रामः विद्यालयं गच्छन् पाठं पठति ।

आ) रामः विद्यालयम् आगत्य पाठं पाठति ।

इ) रामः विद्यालयं गत्वा पाठं पठति ।

ई) रामः विद्यालयं गतवान् पाठं पठति।

29) छात्राः आश्रमं प्राप्तवन्तः। छात्राः विश्रामं कृतवन्तः। (ल्यप्)

वाक्यद्वयं ल्यप् प्रत्ययेन योजयित्वा सम्पूर्णं वाक्यं लिखन्तु।

विभागः – III

भाषांशाः –

ए) अधः दत्तानां प्रश्नानां समाधानानि सर्जनात्मकतया लिखन्तु । $2 \times 8 = 16$

30) संकृतभाषा प्रचाराय एकं करपत्रं रचयन्तु।

अथवा

संस्कृभाषायां अनुवदन्तु ।

శ్రీకృష్ణుడు సుదాముడు బాల్యంలో ఒకే గురువు గారి వద్ద విద్యను నేర్చారు. వారిద్దరూ స్నేహం తో కలిసి మెలిసి తిరిగేవారు. గురువుగారికి సపర్యలు చేసేవారు. కాలక్రమంలో శ్రీకృష్ణుడు ద్వారకాధీశుడైనాడు . సుదాముడు ఎంత పేదరికం లో ఉన్నప్పటికీ ఎవరినీ యాచించక శ్రీకృష్ణుడుని తలచుకుంటూ ఉండేవాడు. భార్య సలహా మేరకు సుదాముడు శ్రీకృష్ణుడుని కలుసుకోవడానికి కొన్ని అటుకులను బహుమానంగా ఇచ్చాడు. దానికే సంతోషించిన శ్రీకృష్ణుడు సుదామునికి అష్టైశ్వర్యాలను ఇచ్చాడు .

31) वरदक्षिणानिर्मूलनाय पत्रिकायां सम्पादकीयं विरच्य प्रकाशयन्तु इति पत्रिकासम्पादकाय लेखं लिखन्तु।

अथवा

संस्कृतभाषायाम् अनुवदन्तु।

శ్రమ అనే పునాదిపైనే అభినృద్ధి భవనం ఆధారపడి ఉంటుంది. శ్రమించడానికి ఎవరూ సిగ్గుపడకూడదు. సోమరితనంతో సమాజానికి భారం కాకూడదు.
శ్రమైకజీవనసౌందర్యాన్ని చూడగలగాలి. శ్రమను గౌరవంగా భావించడం నేర్చుకోవాలి.
శ్రమసంస్కృతిలో జీవించడం నేర్చుకోవాలి.

ऐ) निर्देशानुसारं लिखन्तु। $2 \times 2 = 4$

32) नर्तकी नाट्यं करोति। **अस्य वाक्यस्य कर्मणिवाक्यं चिन्वन्तु**

अ) नर्तक्या नाट्यं क्रियते। आ) नर्तकी नाट्यं क्रियते

इ) नर्तक्या नाट्यं करोति । ई) नाट्येन नर्तकी करोति

33) सौचिकेन वस्त्रं सीव्यते। **कर्तरिवाक्ये परिवर्तयन्तु**